Sudarshan Research Journal
Volume – 1, Issue - 2, June-2023
Page no : 52-56

# वैदिकदर्शनानां विषयविवेचना

**रमनदीप**
**सहायक प्राध्यापिका, संस्कृतविभागः, चौ. देवीलालविश्वविद्यालयः, सिरसा**

*वर्तमानसमये विश्वेऽस्मिन् शनैः शनैः मानवीयमूल्याः ह्रासमानाः जायन्ते। भौतिकतायाः चाकचिक्ये अद्यतनः मानवः* स्वकर्त्तव्यकर्मणां प्रत्युदासीनः संजातः। येन वैचारिकी सम्पदा शून्या सञ्जाता, संसारिणश्च दुःखेषु आकण्ठनिमग्नाः क्लिश्यन्ति। अमुष्यां परिस्थितौ महती आवश्कतास्ति यत् सः भ्रमितः शोकोद्विग्नः जनः वैदिकदर्शनेषु निहितानां तत्वानामनुशीलनं तथानुसारम् आचरणञ्च कुर्यात्। अत एवोक्तं महर्षिणा मनुना - **सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते। दर्शनेन विहीनस्तु संसारं प्रतिपद्यते**[1]॥ प्रस्तुते शोधलेखे अस्मिन् केचित् विषयाः वर्णिताः सन्ति, यथा - वैदिकदर्शनेषु मोक्षस्यावधारणा, वैदिकदर्शनेषु ईश्वरस्य अवधारणा, वैदिकदर्शनेषु दुःखनाशस्यावधारणा, वैदिकदर्शनेषु सिद्धान्तानां साम्यञ्च।

दर्शनशास्त्राणां भारतीयायां वैश्विकज्ञानपरम्परायाञ्च विशिष्टं महत्त्वं वर्तते। सूक्ष्मज्ञानमाध्यमेन आत्मोत्थाने भारतीयदर्शनशास्त्रस्य भिन्न-भिन्नपरम्पराणां महती भूमिका विद्यते। मूलतः दर्शनशब्दः 'दृश दर्शने' धातोः करणार्थकेन ल्युट्-प्रत्ययेन निष्पन्नो भवति, यस्य व्युत्पत्तिजन्योऽर्थः लभ्यते - दृश्यतेऽनेनेति दर्शनम् अर्थात् येन माध्यमेन वयं द्रष्टुं शक्नुमः, परं रूढौ यद्ययमर्थो गृह्यते तर्हि मनुष्यः केवलं चक्षुषा दर्शनक्रियां करोति, अनेन तु नेत्रग्राह्यविषया एव दार्शनिकविश्लेषणस्य परिधौ आगमिष्यन्ति। अत एव दार्शनिकसम्प्रत्ययेषु दर्शनशब्दस्य व्युत्पत्तिः 'दृशिर् प्रेक्षणे' धातोः करणे ल्युट् भावे च घञ्-प्रत्ययं कृत्वा दृश्यतेऽनेनेति दर्शनं, दृश्यते इति दर्शनं गृह्यते। प्रेक्षणस्यार्थः विचारः वर्तते। अतोऽनया व्युत्पत्त्या विचारणार्थकानि साधनानि विचारक्रियायाश्च समस्तविषयाणि दर्शनक्षेत्रे एव अन्तर्भूतानि भवन्ति। मानवः भूतेषु बुद्धिजीविवर्गे आगच्छति, बुद्धेः अभिन्नांशः जिज्ञासा भवति। जिज्ञासाधारे एव मनुष्यः स्वदर्शनं निर्मापयति। तद्दर्शनमेव विकसितं भूत्वा नूतनानाम् आविष्काराणां सिद्धान्तानां च स्वरूपं गृह्णाति।

**वैदिकदर्शनेषु मोक्षस्यावधारणा** - वेदानां प्रमाणं स्वीकुर्वन्तः भारतीयदार्शनिकमनीषिणः स्वजिज्ञासायाः चिन्तनबलेन एव भिन्न-भिन्नदर्शनानां प्रणयनं कृतवन्तः। वस्तुतः दर्शनशब्दस्याभिप्रायः इन्द्रियार्थसन्निकर्षमात्रं नास्ति अपि तु वस्तुनः मिथ्यात्वस्य परिहारं यथार्थस्य च ज्ञानमित्यस्ति। दृष्टान्तेनैकेन स्पष्टीक्रियतेऽत्र - यदि कोऽपि ओदनं भोक्तुमिच्छति, तर्हि तण्डुलचयन-तण्डुलप्रक्षालन-पाकक्रियानन्तरमेव तस्य प्रयोजनस्य सिद्धिर्भवति। यथात्र ओदनप्राप्तिः परं लक्ष्यमस्ति अन्याः

[1] मनु० ६.७४

क्रियास्तु गौणरूपेण साहायिकीभूताः सन्ति, एवमेव ऋषिभिः महर्षिभिः चिन्तितं यत्किं सांसारिकं सुखमेव परं प्रयोजनम् अस्ति ? विषयेऽस्मिन् प्रायशः सर्वेऽपि दार्शनिकाः विद्वांसश्च ऐकमत्यं स्वीकुर्वन्ति यदिदं दृश्यमानं सांसारिकं सुखं शाश्वतं नास्ति, क्षणिकमस्ति, **नात्यन्ताय श्रेयसे**ऽस्ति। कीदृशं तर्हि एतादृशं सुखम् ? यदात्यन्तिकमस्ति, दुःखाभावैश्च युज्यते। किन्नामकः सः दुःखाभावः? अत उच्यते-**मोक्षः मुक्ति**रिति। अस्यां शंकायां जायमानायाम् आस्तिकदर्शनानि पृथक्पृथक्क्रमेण मोक्षस्यैव व्याख्यां कुर्वन्ति। सत्यार्थप्रकाशे महर्षिदयानन्दसरस्वतीवर्य्याः समाधानं कृतवन्तः - **मुञ्चन्ति पृथग्भवन्ति जनाः यस्यां सा मुक्तिः**[2]। भारतीयदर्शनेषु न केवलं श्रुतिसम्मततर्काधारेषु परमतत्त्वस्य सत्तायाः स्वरूपस्य च निरूपणमस्ति अपि तु परमसत्ताविषयिन्याः जिज्ञासायाः अपि वैशद्येन वर्णनमस्ति। सर्वेषु एव भारतीयदर्शनेषु मोक्षः विविधनामभिः प्रोच्यते, यथा - सांख्येऽपवर्गः, योगे कैवल्यम्, न्याय-वैशेषिके निःश्रेयस इत्यादयः। योगदर्शनं कैवल्यरूपेण मोक्षस्य अवधारणां स्थापयति। यथा - **सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति**[3] अर्थात् बुद्धिपुरुषयोः द्वयोरपि शुद्धिसाम्ये सति कैवल्यपदस्य प्राप्तिर्भवति। परमिदानीं प्रश्नोऽयं वर्तते यत् कीदृशं कैवल्यं नाम? कश्च एतत् प्राप्तुं शक्नोति? अतः तस्य स्वरूपम् उपस्थापयति योगदर्शनकारः - **पुरुषार्थशून्यानां गुणानां प्रतिपप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति**[4] अर्थात् कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मकानां गुणानां तत्कैवल्यमिति कथ्यते। कैवल्यमर्थात् केवलीभावः। यदा पुरुषः केवलः एकाकी एकमात्रनिजस्वरूपे तिष्ठति सा अवस्था कैवल्यमिति नाम्ना ज्ञायते। इतोऽन्यत्रापि निर्दिष्टं - **दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः**।[5] एवमेव सांख्यदर्शनेऽपि मोक्षस्यावधारणा विद्यते, यथा - **ज्ञानान्मुक्तिः**[6]। न्यायदर्शनस्य तु प्रारम्भ एव अपवर्गं स्वीकृत्य भवति। न्यायदर्शनकारेण महर्षिणा गौतमेन प्रतिपादितमस्ति यत् - **प्रमाण - प्रमेय - संशय - प्रयोजन - दृष्टान्त - सिद्धान्त - अवयव - तर्क - निर्णय - वाद - जल्प - वितण्डा - हेत्वाभास - छल - जाति - निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसः**[7]। इतोऽपि यथा - **तदत्यन्तविमोक्षोऽपवर्गः**[8]। वस्तुतः न्यायदर्शनं प्रमाणैः अर्थपरीक्षणं शिक्षयति। समस्तेऽपि विश्वेऽस्मिन् प्राणिनां द्विधा प्रवृत्तिः परिलक्षिता भवति - दुःखानामपनयनप्रवृत्तिः अपरा सुखानामिच्छाप्रवृत्तिः। आस्तिकदर्शनेषु दुःखनिवृत्तिरपि द्विधा भवति, एका वर्तमानदुःखनिवृत्तिः, अन्या भाविदुःखनिवृत्तिः, भाविदुःखनिवृत्तेः समाधानं, यथा - **हेयं दुःखमनागतम्**[9]।

---

[2] सत्यार्थप्रकाशः, नवमः समुल्लासः

[3] योग० ३.५५

[4] योग० ४.३४

[5] योग० २.५

[6] सांख्य० ३.२३

[7] न्याय० १.१

[8] न्याय १.१.२२

[9] योग० २.१६

**वैदिकदर्शनेषु ईश्वरस्य अवधारणा** - महर्षिणा पतञ्जलिना विरचितेन योगसूत्रानुसारितया ईश्वरस्वरूपं जगत्कर्त्तृत्वरूपेण कर्मफलप्रदातृत्वेनोक्तं - **क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः**[10]। इतोऽपि यथा - **ईश्वरप्रणिधानाद्वा**[11] **सः पूर्वेषामपि गुरुः कालेनानवच्छेदात्**[12] **तस्य वाचकः प्रणवः**[13] **तज्जपस्तदर्थभावनम्**[14] । बहवो हि व्याख्यातारः सांख्यदर्शनं निरीश्वरवादि इति कथयन्ति, परम् इयं धारणा विशुद्धरूपेण निर्मूला भ्रान्तियुता च वर्तते। यतः स्वयं सांख्यदर्शनकारः सूत्रमाध्यमेन प्रमाणयति - **सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्महतोऽहंकारः, अहंकारात्पञ्चतन्मात्राणि उभयमिन्द्रियं, तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः**[15]। अत्र मूलप्रकृतिः, महत्तत्वम् (बुद्धिः), अहंकारः, पञ्च तन्मात्राणि (शब्द-स्पर्श-रूप-रस-गन्धतन्मात्राणि), ज्ञानेन्द्रियाणि (श्रोत्र-त्वक्-चक्षुः-जिह्वा-घ्राणानि), कर्मेन्द्रियाणि (वाक्-पाणि-पाद-पायु-उपस्थाख्यानि), पञ्च स्थूलभूतानि (आकाश-वायु-तेजो-जल-पृथिव्याख्यानि), पुरुष इत्यनेन ईश्वरः जीवश्च इति द्वावपि चेतनपदार्थौ गृहीतौ स्तः। एवं मिलित्वा पञ्चविंशतिपदार्थानां गणः सम्भवति। इतोऽग्रेऽपि प्रमाणं वर्तते - **ईदृशेश्वरसिद्धिः सिद्धाः**[16] अर्थात् सर्वज्ञादिगुणयुक्तस्य ईश्वरस्य सिद्धिः सिद्धास्ति। एवंविधानां सूत्राणाम् अन्तःप्रमाणैः सांख्यदर्शनस्य सेश्वरवादितायाः सिद्धता सम्भवति। एवमेव वैशेषिकदर्शनस्य प्रतिपादक-अन्नंभट्टकृत-प्रकरणग्रन्थे तर्कसंग्रहे कथितमस्ति आत्मा-परमात्मनोः विषये यत् - **ज्ञानाधिकरणमात्मा, स च द्विविधः - जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञ परमात्मा एक एव, जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च**। वैशेषिकेऽपि - **तद्वचनादाम्नायस्य प्रामाण्यम्**[17]।

**वैदिकदर्शनेषु दुःखनाशस्यावधारणा** - **अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः**[18]। वेदानुमोदितानां वैदिकग्रन्थानां दर्शनानां च स्वाध्यायेन बुद्धेः तैक्ष्ण्यं भवति। अस्माकं दृष्टिः तत्वविवेचिनी भवति। सूक्ष्मेक्षिकया विवेचनेन दोषाणां निर्मूलनं भवति। कीदृशाः ते दोषाः? अविद्यादयः। **अविद्या नेत्रीमूलं सर्वक्लेशानाम्**[19] । यथोक्तं च योगदर्शने - **अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाः पञ्च क्लेशाः**[20]। तत्र **अनित्य-अशुचि-दुःख-अनात्मसु नित्य-शुचि-सुख-आत्मख्यातिः**

---

[10] योग० १.२४
[11] योग० १.१३
[12] योग० १.१६
[13] योग० १.१७
[14] योग० १.१८
[15] सां०द० १.६१
[16] सां० द० ३.५७
[17] वैशे० १.१.३
[18] सां० द० १.१
[19] योगभाष्य ४.११
[20] योग० २.३

**अविद्या**[21] **दृग्दर्शनशक्त्योरेकात्मतेवास्मिता**[22] **सुखानुशयी रागः**[23] **दुःखानुशयी द्वेषः**[24] **स्वरसवाही विदुषोऽपि तथारूढो अभिनिवेशः**[25] न्यायदर्शनस्य षोडशपदार्थानां ज्ञानेन एव मिथ्याज्ञानस्य नाशः, तत्वज्ञानस्य च प्राप्तिः भवति। विषयोऽयं सांख्यकारिकाकारोऽपि उपस्थापयति -

**धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।**

**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः**[i]**॥**

योगदर्शने दोषक्षयार्थं सार्वभौमा महाव्रतम् (योग० २.३१) प्रोक्ताः सन्ति - **अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः**[ii] **शौचसन्तोषतपस्वाध्यायेश्वरप्रणिधानानियमाः**[iii]**।** एत एव अष्टाङ्गयोगनाम्ना जायन्ते। अन्यदपि - **योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः**[iv]**।** किञ्च अद्यतनः मानवः ज्ञानदीप्तिं नेच्छति अपितु धनदीप्तिं पददीप्तिं च इच्छति, येन स उन्मुक्तो भूत्वा विषयाणाम् उपभोगं कर्तुं समर्थः स्यात्। अद्यतने समाजे योगस्य परिभाषा केवलं आसन-प्राणायमपर्यन्तं सीमिता वर्तते, अन्येषां योगाङ्गानाम् उपेक्षा जाता। अत एव सर्वत्र अविद्या, अनाचार, असत्याचारादयः दोषाः बाहुल्येन वितन्यन्ते। ईदृशेषु व्यसनेषु आकण्ठं निमज्जितो वर्तते समाजोऽयम् इदानीम्। प्राचीनकाले तु राजानोऽपि योगमार्गस्यावलम्बनं कुर्वन्ति स्म, अनेन एव राजा जनकः विदेह इति पदवीं प्राप्तवान्। भर्तृहरिणा राजकार्यं त्यक्त्वा संन्यस्तं जीवनं यापितम्। कालिदासोऽपि रघूणां कृते लिखति - योगेनान्ते तनूत्यजाम्। भगवतः कृष्णस्य कृते तु योगीराज इति विशेषणं प्रसिद्धम् एव। प्रमाणमपि पोषयन्ति - **ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति**[v]**।**

**वैदिकदर्शनेषु सिद्धान्तानां साम्यम्** - समेऽपि आस्तिकदर्शनानां सिद्धान्ताः मूलतया वेदेष्वेव विद्यमानाः सन्ति। यथा ऋग्वेदस्था नासदीयसूक्तीया सदसद्विवेचना कपिलमहर्षिणा सांख्यदर्शने सत्कार्यवादरूपेण कृतास्ति। ऋग्वेदस्य हिरण्यसूक्तस्य परिचर्चा महर्षेः कणादस्य वैशेषिकदर्शने परमाणुरूपेण परिलक्ष्यते। **विद्ययाऽमृतमश्नुते** अस्य यजुर्वेदमन्त्रस्य विस्तृतं स्वरूपं महर्षिपतञ्जलेः अष्टाङ्गयोगे प्राप्यते। एवमेव तत्वज्ञानं न्याये, ब्रह्मणः स्वरूपं वेदान्ते, धर्माधर्मस्य विशदविवेचना मीमांसायां वर्णितास्ति। मतमतान्तराणां पोषणकरैः केचन दर्शनग्रन्थानां व्याख्याकारैः स्वसाम्प्रदायिक- सिद्धान्तानां पुष्ट्यर्थं दर्शनशास्त्राणि अपि विवादस्थले स्थापितानि। येषां दर्शानानां विशुद्धज्ञानेन ज्ञानपिपासूनां तृप्तिः, अज्ञानस्य विनष्टिः, दुःखानाञ्च निवृत्तिः भवति, इदानीं तेषु परस्परं विरोधं प्रदर्शितवन्त अल्पज्ञाः।

[21] योग० २.५
[22] योग० २.६
[23] योग० २.७
[24] योग० २.८
[25] योग० २.९

दर्शनेषु साम्यं प्रतिपादयता प्रोक्तं **महर्षिणा दयानन्देन -**

**यथा** घटस्य निर्माणे कर्म-काल-मृत्तिका-विचारणा-संयोगवियागोदिपुरुषार्थ-प्रकृतेः गुण-कुम्भकारादयः कारणाणि अपेक्ष्यन्ते तथैव सृष्ट्युत्पत्तौ यत् कर्मकारणं तस्य व्याख्या मीमांसायां, कालव्याख्या वैशेषिके, उपादानकारणव्याख्या न्याये, पुरुषार्थव्याख्या योगे, तत्त्वानुक्रम-परिगणन-व्याख्या सांख्ये, परमेश्वररूपिणः निमित्तकारणस्य व्याख्या वेदान्तशास्त्रे विद्यमाना वर्तते[vi]।

**उपसंहारः -** वस्तुत ईश्वर - जीव - प्रकृतयः एव दर्शनानां मुख्यविवेच्यपदार्थाः सन्ति। मतमतान्तराणि दर्शनशास्त्राणां वास्तविकं स्वरूपम् उद्देश्यञ्च न निर्दिशन्ति। दर्शनानां स्वरूपं वैदिकसिद्धान्तानां प्रतिपादने एवास्ति। वैदिकसिद्धान्तानां समर्थनं न्यायदर्शनस्य वात्स्यायनमुनिभाष्ये, वैशेषिकस्य प्रशस्तपाद-गौतममुनिभाष्ये, योगदर्शनस्य व्यासमुनिभाष्ये, मीमांसायाः व्यासमुनिभाष्ये, वेदान्तस्य वात्स्यायन-बौधायनमुनिभाष्ये, सांख्यस्य भागुरिभाष्ये एव प्राप्यते। अतः वेदानामुपाङ्गभूतानां दर्शनानाम् अध्ययनेन आचरणेन च अस्माकं जीवनं परिवर्तितं भविष्यति, यतः वैदिकदर्शनेषु जीवनस्य दर्शनं विद्यते। दर्शनेषु जन्मतः मृत्युपर्यन्तं धर्म-कर्म-सदसत्-प्रमाण-अविद्यानाश-विद्याप्राप्ति-बन्धन-मोक्षादयो बहुविधाः विषयाः निहिताः सन्ति।

---

[i] सां० का० ४४
[ii] योग० २.३०
[iii] योग० २.३२
[iv] योग० २.२८
[v] अथर्ववेद ११.५.१७
[vi] सत्यार्थप्रकाश, तृतीयः समुल्लासः